# SY-510

Reg. No. : ......................................

Name : ..........................................

**SECOND YEAR HIGHER SECONDARY EXAMINATION, MARCH 2024**

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

*निर्देशा :*

- 15 निमेषाः समाश्वाससमयः ।
- प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र-तत्र दत्ताः ।
- उत्तरलेखनाय समयः अङ्काः च परिगणनीयः ।

*നിർദ്ദേശങ്ങൾ:*

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു.
- ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**1-8 सप्तप्रश्नानाम् उत्तराणि लिखत ।**

**1 മുതൽ 8 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 7 എണ്ണത്തിന് ഉത്തരം എഴുതുക.**

कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत । **(7 × 1 = 7)**

1. "हरिरिति–हरिरिति जपति सकामम्" । का जपति ?

   (हरिणी, राधिका, केशवः)

2. विश्वचलचित्रेतिहासे प्रथमं संस्कृत चलचित्रं _______ भवति ।

   (मानसी, कुमारसम्भवम्, आदिशङ्कराचार्यः)

3. "कुमारश्चिन्तयामास भाविशिष्यगणं निजम्" । कुमारः कः ?

   (तक्षः, येशुदेवः, गौतमः)

4. कपिलवस्तुनरेशस्य शुद्धोदनस्य मायादेव्याः च सुपुत्रः कः ?

   (सिद्धार्थः, श्रीनारायणगुरुदेवः, येशुदेवः)

5. केरलीयसंस्कृतरूपकाभिनयः भवति _____ ।

   (मोहिनियाट्टम्, चित्रकला, कूटियाट्टम्)

6. सूर्यायसङ्कल्पितम् अलोकसामान्यं मन्दिरं कुत्र वर्तते ?

   (तञ्जावूर्, कोणार्क्, तृश्शिवपेरूर्)

7. आषामेनोन् इति तूलिकानाम्ना विख्यातः कः ?

   (के. श्रीकुमारः, अशोकन्पुरनाट्टुकरा, नारायणन् नम्ब्यार)

8. "आर्य, चन्द्रगुप्तः प्रणमति ।" चन्द्रगुप्तः कः ?

   (राक्षसः, राजा, चाणक्यः)

9. उदाहरणानुसारं पदच्छेदं लिखत । **(2)**

उदा : – हरिरिति → हरिः + इति ।

(क) कविरिति → _____ + _____ ।

उदा : – तापोऽपि → तापः + अपि ।

(ख) बालोऽपि → _____ + _____ ।

10. रेखाङ्कितपदानां स्थाने कोष्ठकात् समानार्थक-पदान्युपयुज्य वाक्यं पुनर्लिखत । **(2)**

प्रातः निर्झर्याः कलरवं श्रुत्वा शाखामृगाणां लाङ्गूलान्तोलनं च दृष्टवा शाखायां मन्दं-मन्दं आन्तोलयन्ती अहं व्याधस्य लक्ष्यमभवम् ।

(वृक्षस्य, वानराणां, निषादस्य)

11. उदाहरणानुसारं वाक्यद्वयं योजयत । **(2)**

उदाः – स्नानं करोति । ईश्वरं वन्दते ।

स्नानं कृत्वा ईश्वरं वन्दते ।

(क) विद्यालयं गच्छति । पाठं पठति ।

_______________________

(ख) घण्टानादं श्रुणोति । कक्ष्याम् आगच्छति ।

____________________________

12. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(3)**

क्रोधात्भवति सम्मोहः सम्मोहात्स्मृति विभ्रमः ।

स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात्प्रणश्यति ।।

प्रश्नाः –

(क) क्रोधात् किं भवति ?

(ख) स्मृति विभ्रमः कथं सम्भवति ?

(ग) बुद्धिनाशात् किं सम्भवति ?

13. अधः प्रदत्तानि वाक्यानि संस्कृतभाषया अनुवदत । **(3)**

(क) ചന്ദ്രഗുപ്തന്റെ മന്ത്രി ആയിരുന്നു ചാണക്യൻ.

Chanakya was the minister of Chandraguptha.

(ख) ചാണക്യതന്ത്രം ലോകപ്രസിദ്ധമാണ്.

The strategy of Chanakya is world famous.

(ग) ചാണക്യന്റെ സഹായത്താ ലാണ് ചന്ദ്രഗുപ്തന് വിജയിക്കുവാൻ സാധിച്ചത്.

Chandraguptha was won by the help of Chanakya.

14. प्रदत्तं गद्यभागं पठित्वा क्त्वान्त–ल्यबन्त–तुमुन्नन्त पदानि चित्वा लिखत । **(3)**

भवन्तः गच्छन्तु, नाहमधुना आगच्छामि । अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः ?

(क) क्त्वान्तपदं ______ ।

(ख) ल्यबन्तपदं ______ ।

(ग) तुमुन्नन्तपदं ______ ।

**15-18 त्रयाणां प्रश्नानाम् उत्तराणि लिखत ।**

**15 മുതൽ 18 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 3 എണ്ണത്തിന് ഉത്തരമെഴുതുക.**

**(3 × 4 = 12)**

15. प्रदत्तं गद्यभागं पठित्वा चत्वारि प्रश्नवाचकानि लिखत ।

भारतीयदर्शनेषु योगशास्त्रस्य मुख्यं स्थानमस्ति । मनः एव मनुष्याणां बन्धमोक्षयोः कारणम् । योगशास्त्रे अष्टाङ्गानि निर्दिष्टानि । उपबोधमनसि परिवर्तनमपि योगेन साध्यम् । योजनं भवति योगः इति पदस्य अर्थः ।

| | | | | |
|---|---|---|---|---|
| किं | कति | केन | कस्य | कथं |

16. श्लोकं पठित्वा गद्यक्रमं लिखत ।

पुरे नासरथेसार्धं कन्यया प्रियया चरन् ।
असिधाराव्रतं तक्षः शिशुंदिव्यमपूपुषत् ।।

**गद्यक्रमः –**

नासरथे _______ प्रियया _______ सार्धम् असिधाराव्रतं _______ तक्षः दिव्यं ________ अपूपुषत् ।

17. श्लोकं श्लोकस्याशयं च योजयित्वा लिखत ।

| **क** | **ख** |
|---|---|
| क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते ।<br>क्षुद्रंहृदय दौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ।। | परस्परं भावयन्तः परंश्रेयः अवाप्स्यथ । |
| उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।<br>आत्मैवाह्यात्मनो बन्धुः आत्मैवरिपुरात्मनः ।। | हे अर्जुन ! हृदय दौर्बल्यं त्यक्त्वा उत्तिष्ठ । |
| देवान् भावयतानेन ते भावान् भावयन्तु वः ।<br>परस्परं भावयन्तः परंश्रेयमवाप्स्यथ ।। | |

18. द्वौ नाटकसङ्केतौ अधिकृत्य लघुटिप्पणीं लिखत –

(क) प्रकाशम्

(ख) स्वागतम्

**19-23 प्रश्नेषु चतुर्णाम् उत्तराणि लिखत ।**

**19 മുതൽ 23 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 4 എണ്ണത്തിന് ഉത്തരം എഴുതുക.**

**(4 × 5 = 20)**

19. आङ्गलभाषया मलयालभाषया वा अनुवदत ।

अद्याहं लोकमपश्यम् । वार्धक्यं मरणं चापश्यम् । वार्धक्यं रोगमरणं च साधारणमेवहि । यद्यपि इतरेषां वेदना न दृष्टा तथापि स्वकीयां वेदनां जानात्येव हि । गात्रस्य वार्धक्यम् अनुभूयेत खलु ।

20. प्रदत्तां खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत ।

मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः । पितरौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावत् वृक्ष एव हि पितरौ । वृक्षः अस्मान् पोतकानिव संरक्षति स्म । मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतान् – यदृच्छया अपश्यम् । वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि आपतत् । अहो ! वृक्षराजः अस्मान् अरक्षत इति संचिन्त्य सर्वे समाश्वस्ताः । अस्तमुपगते भास्वति प्रत्यागतौ पितरौ कृतज्ञतापूर्वं वृक्षराजमनमताम् ।

**प्रश्नाः –**

(क) कौ भोजनमन्विष्य गतौ ?

(ख) वृक्षस्य अधः किमपश्यम् ?

(ग) खण्डिकायाः आशयं संगृह्य स्ववाक्यैः लिखत ।

21. यथोचितं योजयत ।

| क | ख |
|---|---|
| पतञ्जलि महर्षिः | मुद्राराक्षसम् |
| वेदव्यासः | अष्टाध्यायी |
| विशाखदत्तः | महाप्रस्थानम् |
| पाणिनिः | महाभारतम् |
| माटम्प् कुञ्जुकुट्टन् | योगशास्त्रम् |

22. सूचनानुसारं योगशास्त्रमधिकृत्य एकां खण्डिकां (paragraph) लिखत ।

- योगशास्त्रम् ।
- मनसः विमलीकरणम् ।
- शरीरेन्द्रियाणां मनसः प्रवर्तनक्षमता ।
- व्यक्तित्वविकासः ।

23. प्रदत्तखण्डिकायां आङ्गलेय पदानां स्थाने संस्कृतपदान्युपयुज्य यात्राविवरणं पुनर्लिखत ।

2022 वर्षे विद्यालयात् study tour समारम्भितम् । यात्रायां बस् याने त्रिंशत् students सन्ति । In the morning सर्वे वयं कोणार्कमन्दिरं द्रष्टुं प्रातिष्ठत । पुरीतः कोणार्क प्रति road एका ऋजुरेखा भवति । मार्गः 32 कि.मी. परिमितं दूरं वर्तते । सूर्याय सङ्कल्पिते कोणार्कमन्दिरे worship नास्ति ।

(आराधना, प्रभाते, छात्राः, पठनयात्रा, पन्था)

**24-27 त्रयाणां प्रश्नानाम् उत्तराणि लिखत ।**

**24-27 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 3 എണ്ണത്തിന് ഉത്തരം എഴുതുക. (3 × 6 = 18)**

24. 'दीनदयालुर्भव' इति पाठभागानुसारं कथास्तम्भान् क्रमीकृत्य लिखत ।

- न्यायाधीशः एकाधिकशतं ताडनं दण्डरूपेण अघोषयत् ।
- तत्रस्थैः अन्तेवासिभिः परिश्रमेण गृहीतोऽयं चोरः ।
- एकदा क्षुधार्तः कश्चित् कदलीफलगुञ्जम् उषितवान् ।
- मठस्य समीपे एकं कदलीवनमवर्तत ।
- अयं चोरः आरक्षिजनसमक्षं नीतः ।
- संन्यासिवर्येण श्रीनारायणगुरुणा स्थापितः एकः मठः आसीत् ।

25. अधः प्रदत्तान् सम्भाषणांशान् पूरयित्वा पुनर्लिखत ।

छात्रः : गुरो प्रणामः ।

आचार्यः : ______________ ।

छात्रः : अहं कूटियाट्टमधिकृत्य ______________ ।

आचार्यः : सम्यक् । कूटियाट्टपठनार्थं केरलकलामण्डले अवसरमस्ति ।

छात्रः : केरलकलामण्डलं ______________ वर्तते ?

आचार्यः : तृशूरजिल्लायां भवति । तत्र बहवः छात्राः कूटियाट्टं पठन्ति ।

छात्रः : ____________ धन्यवादः ।

आचार्यः : स्वस्ति अस्तु ।

26. अधः प्रदत्तं गद्यभागम् आधारीकृत्य एकां पठकथां लिखत ।

एतं वृक्षं त्यक्त्वा मम बान्धवाः पक्षिणश्च सर्वे गताः । किन्तु अहं कुत्रापि न गच्छामि । कोऽपि मां स्पृशति...... । का एषा ? सा सहसा प्रबुद्धा । "वत्से" ।

शारिकापुरतः स्मिताननां काञ्चन तापसीम् अपश्यत् । "अम्ब प्रणामः" । शारिके ! जानामि सर्वं वृत्तान्तम् । सम्यगाचरितं भवत्या । तव स्नेहस्य ममतायाः आर्द्रतायाः च फलं नूनं प्राप्स्यसि । सा वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ।

27. अधः प्रदत्तेषु इष्टतमं गीतं चित्वा आस्वादन टीकां लिखत ।

(क) सरसमसृणमपि मलयजपङ्कम् ।

पश्यति विषमिव वपुषि सशङ्कम् ।।

(ख) नयनविषयमपि किसलयतल्पम् ।

कलयति विहितहुताशनकल्पम् ।।

(ग) हरिरिति हरिरिति जपति सकामम् ।

विरहविहितमरणेव निकामम् ।।

**28-29 एकस्य प्रश्नस्य उत्तरं लिखत ।**

**28 മുതൽ 29 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഒരെണ്ണത്തിന് ഉത്തരം എഴുതുക.** **(1 × 8 = 8)**

28. प्रदत्तं गद्यभागं पठित्वा श्रीनारायणगुरुदेवस्य जीवनचरित रूपरेखां (Profile) लिखत ।

श्रीनारायणगुरुदेव : 1854 तमे वर्षे केरले तिरुवनन्तपुरस्य समीपे चेम्पषन्ती ग्रामे जनिमलभत । तस्य पितरौ माटनाशान् तथा कुट्टियम्मा च । तेन महाभागेन आत्मोपदेशशतकं, दर्शनमाला, दैवदशकम् इत्यादि काव्यानि रचितानि । नाणुआशान् इति नाम्ना प्रसिद्धोनारायणगुरुदेवः सामाजिक आध्यात्मिक मण्डले च अनितरसाधारणप्रतिभां प्रकटितवान् । सः 1928 तमे वर्षे सितम्बर मासे तिरुवनन्तपुरं जिल्लायां वर्कला देशे समाधिं प्राप ।

नाम :

पितरौ :

जन्मवर्षः :

जन्मस्थलम् :

कर्मरङ्गः :

कृतयः :

समाधिस्थलम् :

समाधि वर्षः :

29. अधः प्रदत्तसूचनानुसारं "संस्कृतभाषायाः प्राधान्यम्" इति विषयमधिकृत्य लघूपन्यासं लिखत ।

**सूचनाः –**

- सर्वेषां भारतीय भाषाणां जननी ।
- वेद–इतिहास–पुराणानि ।
- संस्कृतव्याकरणस्य प्राधान्यम् ।
- दर्शनानि – आयुर्वेदः – काव्यनाटकादीनि ।